# Shri Balakrishna Ashtakam

# શ્રીબાલકૃષ્ણાષ્ટકમ્

## Document Information

Text title : bAlakRRiShNAShTakam 1

File name : bAlakRRiShNAShTakam.itx

Category : vishhnu, krishna, puShTimArgIya, aShTaka

Location : doc_vishhnu

Author : jIvaneshajI

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

Shri Balakrishna Ashtakam

# શ્રીબાલકૃષ્ણાષ્ટકમ્

યત્કૃપાદૃષ્ટિસદ્વૃષ્ટિસિક્તા ભક્તા નિરન્તરમ્ ।
ભવન્તિ સુખિનઃ સ્નિગ્ધાસ્તં શ્રીબાલહરિં ભજે ॥ ૧॥

પ્રતિપક્ષક્ષયાત્ક્ષોણ્યામક્ષ્ણુ જાતં મહદ્યશઃ ।
યત્કૃપાલેશમાત્રેણ તં શ્રીબાલહરિં ભજે ॥ ૨॥

સ્વીયવિશ્લેષજક્લેશો નષ્ટઃ પુષ્ટઃ સુખોદિતઃ ।
યત્કૃપાલેશમાત્રેણ તં શ્રીબાલહરિં ભજે ॥ ૩॥

સુસ્થિરં સુદૃઢં પૂર્ણં પ્રિયં પ્રાપ્યેત સત્વરમ્ ।
યત્કૃપાલેશમાત્રેણ તં શ્રીબાલહરિં ભજે ॥ ૪॥

સુસમ્પદા સત્કલયા સદ્વિદ્યાવૃદ્ધિગામિની ।
યત્કૃપાલેશમાત્રેણ તં શ્રીબાલહરિં ભજે ॥ ૫॥

અનન્યાઽહૈતુકી પૂર્ણા સ ભક્તિઃ સુદૃઢા ભવેત્ ।
યત્કૃપાલેશમાત્રેણ તં શ્રીબાલહરિં ભજે ॥ ૬॥

ઇયત્તારહિતો નિત્ય આનન્દઃ પ્રાપ્યતેઽનિશમ્ ।
યત્કૃપાલેશમાત્રેણ તં શ્રીબાલહરિ ભજે ॥ ૭॥

શ્રીવલ્લભેશપાદાબ્જે રતિઃ સ્યાદ્વિમલા પરા ।
યત્કૃપાલેશમાત્રેણ તં શ્રીબાલહરિં ભજે ॥ ૮॥

અષ્ટકં શ્રીબાલહરેરિદં મઙ્ગલકૃત્પ્રિયમ્ ।
પઠેદ્વા શૃણુયાદ્ભક્ત્યા ફલં વિન્દેત્સ વાઞ્છિતમ્ ॥ ૯॥

ઇતિ શ્રીમદ્વલ્લભાચાર્યચરણૈકતાન-
શ્રીમદ્ગોકુલોત્સવાત્મજશ્રીજીવનેશજીવિરચિતં
શ્રીબાલકૃષ્ણાષ્ટકં સમાપ્તમ્ ।

Proofread by PSA Easwaran

*Shri Balakrishna Ashtakam*

pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*